Shri Raghunatha Temple MSS. Library,
JAMMU

No. ८६१ - घ

Title मुहूर्त्तचिन्तामणिः

Author

Extent ६ Age

Subject सम्पूर्णम्

नं० ८६१-घ

मुहूर्तचिंतामणेः वास्तुप्रकरणम्

पीयूषधारिकाख्यटीकासहितम्

पत्राणि ८ (सम्पूर्णम्)

नं० ८६१-घ

८ पत्रे

नं० ८६१-घ
मुहूर्त्त चिन्तामणिः
पीयूषकणिकाटीकासहितम्
वास्तु प्रकरणम्
पत्राणि ८ (सम्पूर्णम्)

नि

॥ॐ नमो गणपतये॥ अथ वास्तुप्रकरणं। अत्र वास्तुशब्देन गृहकर्मारंभ उच्यते। तदर्थं ममासौ ग्रामः शुभोऽशुभो वा ममास्मिं
ल्लाभो हानिर्वा ग्रामस्य च कस्मिन्पार्श्वे मया वस्तव्यमित्यादि विचारमाह यद्भमिति यद्भं यस्य ग्रामस्य भं राशिर्नामभात्स्वना
मराशेर्द्विनवपंचैकादशमितं स्यादसौ ग्रामः शुभः यथा महादेवस्य सिंहराशितो वाराणस्याद्य वराशिर्दशमो तो वाराण
सी महादेवस्य शुभावासयोग्येति। किंच। लाभालाभविचारे स्ववर्गं प्रसिद्धनामाद्यक्षरानुसारेणाकचटादिवर्गसंख्यां द्विगु
णां विधाय परवर्गेण परवर्गसंख्यया युतं तं कृत्वा गजैरष्टभिः शेषितं भागानंतरं शिष्टोंकः काकिणो भवति एवं परवर्गं
द्विगुणं स्ववर्गाद्यं कृत्वाष्टभक्तं तस्य काकिण्यः। एवमनयोर्नरग्रामयोः काकिण्यो भवति पुनस्तद्विवरं तत्तासामुभयोः का
किणीनामंतरं तो यस्य काकिण्याधिकाः सोर्थदो यस्य चाल्पाः स गृहीते त्यर्थः यथा महादेवस्य वर्गो मूर्धकस्तत्संख्या द्वद्वि

यद्भं ध्वंकसुतेशादद्विभूतमसौ ग्रामः शुभो नामभात्स्ववर्गं द्विगुणं विधाय परवर्गाद्यं गजैः शेषकं। काकिण्यस्त्वन
योर्यत द्विवरं तो यस्याधिकाः सोर्थदो यद्वारं द्विजवैश्यमध्ये न पराशौ नाहितं स्वतः। १। नो सिंहन कामिथुनं निवसे
न्नमध्ये ग्रामस्य पूर्वककुभोलि वृषांगनाश्च। ककोधनुस्तुलभमेषघटाश्च तद्वर्गाः स्वपंचमपरा बलिनः
स्युरैंद्याः। २।

गुणा १२ वाराणस्या वर्गो मग स्तत्संख्या ७ तथा युक्ता १९ अष्टभिः शेषिता ३ एवं वाराणसी
वर्गसंख्या ७ द्विगुणा १४ महादेववर्गेण ८ युता २२ गजभक्ता ६ तद्विवरंतो वा शिष्टं ३ अत्र ग्रामकाकिणीनामधिकत्वाद्वा
राणसी महादेवस्य लोभ इति। प्रकारांतरमुक्तं वसिष्ठादिभिः। साध्यवर्गं पुरः स्थाप्य पृष्ठतः साधकं न्यसेत्। विभजेदष्टभिः
शेषं साधकस्य धनं स्मृतं। व्यत्ययेनागतं शेषं साधकस्य ऋणं स्मृतं। धनाधिके स्वल्पर्णे सर्वसंपत्प्रदं स्मृतमिति। साध्यो
ग्रामादिस्तद्वर्गसंख्यां पुरः पूर्वं स्थाप्य पश्चात्साधकं नरादेर्वर्गसंख्यां पृष्ठतस्तदग्रे न्यसेत् व्यत्ययेन साधकवर्गं पूर्वं
साध्यवर्गं च पृष्ठतो न्यसेत् यथा साध्या वाराणसी तद्वर्गसंख्या प्राक् साधकस्य महादेवस्य च वर्गसंख्या पृष्ठे न्यस्ता ७८ अ

षड्भक्ताच्छिष्टं ४ धनं व्ययन्यासे ६७ षड्भक्ताच्छिष्टं १ स्यात् एवं तथा च धनाधिकत्वाद्द्वाराली शुभा। अथ द्वारनिवेशनमाह

अयेति द्विजादिराशीनां प्राच्यादिषु द्वारं हितं। यथा कर्कालिमीनानां प्राच्यां ५।९।१ राशीनां दक्षिणस्यां ६।१०।२ पश्चिमस्यां ७।११।३ उ-

दीच्यामिति शार्दूल०।१८। किंच गोसिंहेति वृषसिंहमकरमिथुनान्यतमराशिमान्नरो ग्राममस्य मध्ये न निवसेत्। एवं पूर्वककुभः पू-

१ र्वदिशो ह्यष्ट दिक्ष्वाल्यादयो न वसेयुः। वृश्चिकः प्राच्यां। मीन आग्नेय्यां। कन्या दक्षिणस्यां। एवमग्रेऽपि। तद्वत्तथा वर्गाः अकचटतपयशाख्या वै-

श्याः स्वतः क्रमाद्वलिनः स्युः कीदृशा वर्गाः स्वस्मात्पंचमः परो वैरी येषां ते तथा। यथा अवर्गः प्राच्यां वली तेन पश्चिमदिशि पंचम्यां

द्वारं वासो वा न कार्यः। एवं कवर्गेणाग्नेय्यां वलिना वायव्यां द्वारादि न विधेयमेवमग्रेऽपि। वसंततिलका।२। अथेष्टभूम्या विस्ताराया-

मानिर्णयार्थं स्वेष्टनक्षत्राया भाषांपिंडानयनमाह। एकोनितेति। द्विघ्नः पंचाघ्न उत्तरे करात रूपाक्षवांकाः १५२ एकोनितेनेष्ट-

=एकहीनध्या र्क्षेणाष्टर्क्षस्याश्विन्यादिगणनायातसंख्यया हतागुणिताः संतः रूपोनितएकहीनोयइष्टायो ध्वजादिस्तेन तत्संख्यया हतागुणिताः

एकोनितेष्टर्क्षहताद्वितिघ्नी रूपोनितेष्टायहतेंदुनागैः। युक्ताघनेभ्याविधुता विभक्ता भक्ताभूपाश्विभिः

शेषमितो हि पिंडः।३। स्वेष्टायनक्षत्रभवोऽथ दैर्घ्यहृत्साद्विस्तृतिर्विस्तृतिहृच्च दीर्घता।

इंदुनागा एकाशीति ८१ ध्रुवांकास्तैर्युताः पुनर्घनेभः सप्तदशाभिः ध्रुवैर्युताः भूपाश्विभिः षोडशोत्तरद्विशतैः २१६ र्विभक्ताः स्युः

ततो यः शिष्यते कस्तन्मितः पिंडः क्षेत्रफलाख्यः स्यात् कीदृक् पिंडः स्वेष्टायनक्षत्रभवः। स्वस्येष्टाभ्यामायनक्षत्राभ्यां भवति जाय १

ते इति तथा सः। अथ स पिंडो दैर्घ्यहृत् यत्र भूमौ गृहमारब्धुमिष्टं तत्र कल्पितेन दैर्घ्येणायामेन विभक्तः भागे दत्ते शिष्टांक समाव

स्तृतिर्विष्कंभो विस्तारः स्यात् एवं स एव पिंडो विस्तृतिहृत् कल्पितविस्ताराविभक्तो दीर्घता स्यात् तथा च तावदायामविस्तारवती भूः सु-

खदा भवति। इदमत्रोदाहरणम्।

मु.चि.टी.

अथ पिंडादायानयनमाह। आया इति। पिं॰ ८ छ रो विते ध्वजादिका आयाः स्युस्तेच ध्वज धूम्रादि संज्ञकाः हरिः सिंहः श्वा शुनकः गौ वृषः खरो गर्दभः इभो गजः ध्वांक्षः काकः।

अथायानुसारेण द्वारनिवेशनमाह। ध्वजादिका इति। ध्वजादिकाइतिहरवानुषंग। ध्वजे आये सर्वदिशि गृहस्य मुखं कार्यं चत्वारि द्वाराणि चतुर्दिक्षु स्युरित्यर्थः। एवं हरौ सिंहाख्ये आये ह्रस्वयमोन्तरे दिक्त्रये द्वाराणि स्युः न प्रतीच्यामित्यर्थः। वृषे प्राच्यामेव द्वारं नान्यादिक्त्रये। गजे आये प्राग्यमयोः द्वारि कार्ये न प्रतीच्युदीच्योः। इदमत्र बीजं। ध्वजादीनां प्रागादि दिगष्टके क्रमादवस्थितिस्तेषु च समानाम शुभत्वात् विषमानां च शुभत्वात् स्वस्व संमुख दिक्ष्वेव द्वारं न विदिक्षु ततो ध्वजे प्रतीच्यां सिंहे उदीच्यां वृषे प्राच्यां। गजे अवाच्यां द्वारं न्याय्यायातं तत्रापि ध्वजस्य सर्वदिक्षु सिंहस्य गोगजदिशोः वृषे गजस्य गोदिश्यपि शुभप्रदत्वात्तत्तदायेतत्तद्दिगभिमु

आया ध्वजो धूम्रहरिश्वगोखरेभध्वांक्षकाः पिंडहृता ष्ट शेषिते। ध्वजादिकाः सर्वदिशि ध्वजे मुखं कार्यं हरौ ह्रस्वयमोन्तरे तथा। प्राच्यां वृषे प्राग्यमयो गजे थवा पश्चाद्दुदक्ह्रस्वयमे द्विजादितः। पान्थहे रात तस्त्री सुखवित्तनाशो कें दीज्यशुक्रे विवलेस्तनीचे। कर्तुः स्थितिर्नो विधुवास्तुनोर्मेषुरः स्थिते पृष्ठगते खनिः स्यात्। ६

खद्वारोक्तेः। तदुक्तं विश्वकर्मणा। ध्वजो धूम्रो हरिः श्वागोः खरो भो वायसोष्टमः। स्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिरिति। श्रीपतिश्च गृहे पुराया विषमाः प्रशस्ताः स्वस्थानगाः सर्वगतो ध्वजश्च। ध्वजो हरौ तौ च गजे वृषे ते वृषो हि नान्यत्र समा [illegible] श्रितः स्यादिति। ध्वजः स्वस्थानहरजित एव परं तु हरौ सिंहाय स्थाने पशुभः एवमग्रेपि। तौ ध्वजासिंहौ। ते ध्वजसिंहगजाः। वृषः स्वादिश्येव हरजितो नान्यत्रेत्यर्थः। आयानां विनियोगोपि विश्वकर्मणोक्तः। वृषं सिंहं गजं चैव खेट कर्पटको ट्ययोः। द्विपः पुनः प्रयोक्तव्यो वापी कूपे सरस्सु च। मृगेंद्रमासने दद्याच्छयने तु गजं पुनः। वृषं भोजनपात्रेषु छत्रादिषु पुनर्ध्वजं। अग्निवेश्मसु सर्वेषु गृहे वन्ह्युपजीविनां। धूम्रं नियोजयेत् केचिच्छ्वानं म्लेच्छादि जातिषु। खरो वेश्यगृहे शस्तो ध्वांक्षः शेषकुटीषु च। वृषसिंहध्वजाश्चापि प्रासादपुरवेश्मसु। वसिष्ठः। गजाये वा ध्वजाये वा राजानां सदनं शुभं। पशुस्थानं द्वृषाये च ध्वजाये वा शुभप्रदम्। शाल्यान्तु वृषभः

मु. ५

२

रास्तः पीठे सिंहः शुभप्रदः। अमत्र छत्रचक्राणां स्पायेवाध्वजेपि वा। पादुके पानहौ काष्ठौ सिंहासनेप्यथवाध्वजे। उक्तानामप्यनुक्तानांमंदिर
णांध्वजः शुभइति। आयानयनप्रकारो पवोचि विप्पकर्मणा। विस्तारेणाहतंदैर्घ्यंविभजेदष्टभिस्ततः। यच्छेषंसभवेदायोध्वजाद्यास्तेस्यु
रष्टधेति। अथवर्णक्रमेणद्वारनियममाहाथवेति॥ द्विजादितोब्राह्मणादितो वर्णेति, पश्चिमोत्तरपूर्वदक्षिणानुक्रमाद्गृहद्वारंस्यात्। यथाह
च्यवनः। ध्वजे पराख्ये विप्राणां राज्ञां सिंहे पुरःस्थितं। गजेप्युत्तरस्यामपि याम्यां स्यात् पूर्वमुखं विशश्चेति। उपजातिः छंदः। ५। अथगृहारंभेविहि
तकालंनिषेधयति। गृहेशेति। अर्केति सूर्ये गृहकर्तृजन्मराशिवशाद्दिवले दुष्टस्थानस्थेथवा नीचे नीचराशिस्थे सति यदि गृहारंभः क्रि
यते तदा गृहेशस्य विनाशः। एवं चंद्रेनिर्बलेस्ते सूर्यसंगमेन क्षीणप्रभे नीचे वा सति तस्य गृहेशस्य स्त्रीविनाशः। तथा गुरौ विबलेस्तेनीचे
सुतनाशः। शुक्रे तथाविधेसति वित्तहानिः। किंच विधोर्मध्यमदिनभे नक्षत्रे वास्तुनो गृहस्य चभे विस्तारायामौ त्यक्त्वा नक्षत्रे पुरःस्थिते स
ति कर्तुस्तत्र गृहे स्थितिर्वासो न स्यात्। तस्मिन्नेव नक्षत्रे पृष्ठगे सति खनित्तस्करकृतखननद्वारा द्रव्यहानिरित्यर्थः। पुरः पृष्ठगत्वंच
नक्षत्रस्य कृत्तिकादि दिग्द्वारभगणेन यथा पूर्वं कथितं तथा ग्रहं कृत्तिकादौ मेघादौ च नक्षत्रसप्तके नार्यमघादौ धनिष्ठादौ च पूर्व
मेवं दक्षिणद्वारादावदिक्रमाद्बोध्यं। यद्वा लग्नात्केंद्राणां १।४।७।१० प्रागुदक् पश्चिमदक्षिणादिशो भवंति ततो लग्नस्य भं दृक् प्राङ्मुखे ग
गेकर्तृमे पुरस्थः अवाङ्मुखे वामगः। प्रत्यङ्मुखे पृष्ठगः उदङ्मुखे दक्षिणगः एवं दक्षिणमुखे गृहे दशमस्थः पुरस्थः एवं सर्व
दिक्ष्वपि पुरः पृष्ठगो वर्ज्यः वामदक्षिणगो ग्राह्यः एवं गृहनक्षत्रस्यापि राशिविचारेण पुरस्थत्वादिकं बोध्यं। उपजातिः। ६। एवमायमाभि
धाय व्ययं कथयन्नेव राशिकृतान्यफलं दर्शयति। भामिति। भं स्वर्योन्तकरास्पाजातंयत्

भं नागतष्टं व्ययइरितोसौध्वजादिनामान्तरयुक्सपिंडः। तष्टोगुणैरंशकृतांतभूपा धं शामवेयुर्नशुभोंतकोत्र। ७।

गृहनक्षत्रं तन्नागतष्टमष्टभक्तावशिष्टं व्ययइरितः तत्राधिकायमल्पव्ययं गृहं शुभं असौव्ययोध्वजादिनामाक्षरयुगवसु मालरी
त्याधिकी बितिद्वारानुरोधेन गृहस्य ध्वजादियन्नाम सपन्नं तदक्षरसंख्यया युक्तः। पुनः सपिंडः प्रागानीतपिंडांकसंख्यान्वितः। ततो गुणैस्त्र
भिस्तष्टो विभक्तोवशिष्टांकसमा अंशाः स्युः एकशेषे इंद्रः द्विशेषेयमस्त्रिशेषे राजा। अत्र विध्वंशके शुभं अंतकोयमोंशो न शुभः। उपजातिः। ७।

अथ शालानामानयनार्थमाह। दिक्ष्विति। पूर्वादितः प्राच्यादिषु दिक्षु द्वारे कृते क्रमेण शालानां ध्रुवाद्यंका ज्ञेयाः प्राच्यां द्वारे कृते त्विभूरेको ध्रुवांकः। दक्षिणस्यां द्वारे द्वौ। पश्चिमस्यां कृताश्चत्वारः। उदीच्यां गजा अष्टौ। एवं च यावंति द्वाराणि चिकीर्षितानि तावतां शालाध्रुवांकानां संयोगो मिलापः कार्यः पुनः सैकः एकेनांकेनाभिमिलितः तावदंकसंख्याकं ध्रुवादिसंज्ञकं वेश्म गृहं स्यात्। ८। ध्रुवादिनामाक्षरसंख्याज्ञानायाह। तिथ्यर्केति। सैके ध्रुवांकसंयोगे तिथ्यर्कादि १५।१२।८।१६।९।१३।१४ मिते गृहे नामाक्षरत्रयात्मकं भविष्यतीति ज्ञेयं भ्वादि १।२।४।५।६।१०।११।३ मिते द्व्यक्षरात्मकं नाम। नगेसप्रमिते ध्वयश्चतुर्वर्णात्मकं नाम। ९। तान्येव नामान्याह। ध्रुवेति। अ

दिक्षु पूर्वादितः शालाध्रुवा भूद्वौ कृता गजाः। शालाध्रुवांकसंयोगः सैको वेश्म ध्रुवादिकं। ८। तिथ्यर्काष्टाष्टिगोरुद्र
शक्रे नामाक्षरत्रयं। भूद्व्यब्धीषुगदिग्वाह्निविश्वेषु द्वौ नगेऽब्धयः। ९। ध्रुवधान्ये जयनंदौ खरकांतमनोरमं सु
मुखदुर्मुखोग्रं। अहितं धनदं नाशमाक्रंदं विपुलविजयाख्यं स्यात्। १०।

न्नामसमानं फलं ज्ञेयं। खरदुर्मुखोग्राहितनाशाक्रंदानामशुभदत्वमन्येषां च शुभदत्वमिति। अत्रोदाहरणं। यथा प्राग्द्वारे गृहे ध्रुवांकः १ सैकः २ तथा च द्व्यक्षरात्मकं नाम धान्यमिति। प्राग्दक्षिणद्वारे गृहे ध्रुवाः ३ सैकाः ४ ततो द्व्यक्षरं नंदं नाम। केवलदक्षिणद्वारे ध्रुवाः २ सैकाः ३ द्व्यक्षरं जयं नाम। पश्चिमद्वारे ध्रुवाः ४ सैकाः ५ द्व्यक्षरं खरं नाम। दक्षिणपश्चिमद्वारे ध्रुवाः ६ सैकाः ७ ततश्चतुर्वर्णं २
मनोरमं नाम। प्रागवाक्पश्चिमद्वारे ध्रुवाः ७ सैकाः ८ तेन त्र्यक्षरं सुमुखं नाम। एवमग्रेऽपि योज्यं। नन्वेवं गणनया गृहाणां पुनः षोडश भेदाः समा यांति। ध्रुवनामगृहे तु नामा। इति तात्पर्यमिति चेत्। सत्यं तत्त्वं छंदःशास्त्रोक्तचतुरक्षरछंदःप्रस्तारे षोडशधा भिन्ने चतुर्णां वर्णानां च

तस्योद्देशो लघूनां च द्वारालिंदकल्प्यंत इति कृत्वा प्रथमभेदस्य निर्लघुत्वाद्द्वाराभावेन कोष्ठीसदृशं प्रथमं गृहं ध्रुवाख्यं। शेषाणां भेदानां क्रमात्
धान्यादिनामानि। अथ कृतात् तावेनैव प्रस्तारं द्वारानुसारेण ध्रुवांकसंयोगाद्गृहनामानयनस्योक्तत्वाद् ध्रुवगृहस्य चानिर्धारित्वात् कथं
तदानयनं स्यात् अत एव ध्रुवांकसंयोगस्य सैकताकरणमुक्तमिति। प्रस्तारप्रकारस्तूक्तो नारदेन। गुरोरधो लघुः स्थाप्यः पुरस्ताद्
इवं न्यसेत्। गुरुभिः पश्चिमं सर्वं सर्वलघ्वविधावधिरिति। आर्यागीतिः छंदः। १०। अथ केषामपि मतेन गृहस्यायादि नवकान

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
ऽऽऽऽ	।ऽऽऽ	ऽ।ऽऽ	।।ऽऽ	ऽऽ।ऽ	।ऽ।ऽ	ऽ।।ऽ	।।।ऽ	ऽऽऽ।	।ऽऽ।	ऽ।ऽ।	।।ऽ।	ऽऽ।।	।ऽ।।	ऽ।।।	।।।।
ऊर्द्ध द्वारं	प्राग्द्वारं	दक्षिण द्वारं	प्राग्दक्षिण	पश्चिमद्वारं	प्राक्पश्चिमद्वा	दक्षिणपश्चि	प्रा·द·पश्चिम	उत्तरद्वारं	प्रागुत्तरद्वा	दक्षिणोत्तर	प्रा·द·उत्तर	पश्चिमोत्तर	प्रा·प·श्चि·उ	द·प·उत्त·द्वा	चतुर्द्वारं
ध्रुव	धान्य	जय	नंद	खर	कांत	मनोरम	सुमुख	दुर्मुख	उग्र	अहित	धनद	नाश	आक्रंद	विपुल	विजय

यनमाह। पिंडशति
घ्रम्यां। पिंडे सर्वोत्प
न्ने नवादिभिर्गुणि
ते क्रमान्नागादिभि
र्विभाजिते आयादयः

स्युः। यथा पिंडे नवभिर्गुणिते नागैरष्टभिर्भक्ते शेषमायो ध्वजादिः स्यात्। स च विषमः शुभः समः शोकादिदः। पिंडे केर्नवभि
र्गुणिते नगैः सप्तभिर्भक्ते शेषं वारः सूर्यादिर्वारः स्यात् तत्र सूर्यभौमौ निंद्यावितरे शुभाः। पिंडे गैः षड्भिर्गुणिते कैर्नवभिर्भक्ते शेषांको नवां
शः स्यात्तेषु सूर्यभौममदांशा निंद्याः शेषग्रहाणामनिंद्याः वक्ष्यमाणेन नक्षत्रवशेन राशिं ज्ञात्वा तदीया ज्ञेया द्विराशपालमकेतु मगादौन
नक्षत्रे शाकचतुष्टयेन पादचतुष्टयं कल्पयित्वा तद्वशेन राशिनिर्णयः कार्यः। पिंडे गजैरष्टभिर्हते सूर्ये द्वादशभिर्भक्ते द्रव्यं धनं स्यात्।
त्रिभिर्हते ष्टभिर्भक्ते ऋणं स्यात्। धनाधिक्ये धिकं गृहं हन्ये निर्धनाय ऋणाधिकमिति। पिंडे ष्टभिर्गुणिते सप्तविंशत्या भक्ते नक्षत्रं स्या
त्। तच्च गृहस्वामिनक्षत्रात् त्रि। पंचसप्तममषष्ठभं शेषं शुभं। गृहगृहस्वामिनक्षत्रयोरैक्यं च मृतिप्रदं दुष्टमिति। वृहस्पति नक्षत्रैक्येपि
राशिभेदेन दोषक्षयं कं विवाहप्रकरणे। अस्मादेव नक्षत्राद्वर्णवश्यादिप्रीत्यष्टकं विचार्यं अत्र च नाडीवेधो न दोषावह इत्युक्तम्।
चिंतामणौ। सेव्यसेवकयोश्चैव गृहतत्स्वामिनोरपि। परस्परं मित्रयोश्चैकनाडी प्रशस्यत इति। पिंडे ष्टभिर्हते तिथिभिः पंचदशभिः

विभक्ते शिष्टांकसमा तिथिः सा च रिक्ता मावस्या तिरिक्ता शुभा। चतुर्भिर्मिश्रगुणिते सप्तविंशत्याभक्ते शिष्टं युतियोगो विष्कुंभादिः स्यात्।
स च विष्कुंभगंडातिगंडशूलपरिघवज्रादिरशुभः सौभाग्यप्रीत्यादिः शुभः। अष्टभिर्गुणितो वंशो तरशतेन भक्ते शिष्टमायुरेतावंत
४ कालं गृहं स्यात्स्वती सर्थः अथ गृहेशो निवास्यतं। उपजातिस्त्वनुष्टुभौ।।११।।१२।। एवं हस्तादिगणनया पिंडो सन्नायममयादि यत्र न शु
भदं तत्रांगुलादिमानावापोद्वापाभ्यां सेव फलं शोध्यं। तदुक्तं भीमपराक्रमे शा। कररमानादगुलो चेत्तदांगुलादिप्रदायहित्वा वा। तेत्र

५ पिंडे नवांकांगगजाग्निनागनागाब्धिनागैर्गुणिते क्रमेण। विभाजिते नागनगांकसूर्यनागर्त्तुतिथ्यर्क्षखभा
नुभिश्च। ११। आयो वारोंशको द्रव्यमृणमृक्षं तिथिर्युतिः। आयुश्चाथ गृहेशार्क्षं गृहभे व्यंमतिप्रदं। १२।
गेहाद्यारंभेर्कभाद्वत्सशीर्षे रामैर्दाहो वेदभैरग्रपादे। शून्यं वेदैः पृष्ठपादे स्थिरत्वं। रामैः पृष्ठे श्रीर्युगैर्दक्षकु
क्षौ। १३। लाभो रामैः पुच्छभैः स्वामिनाशो वेदैर्नैःस्वं वामकुक्षौ मुखस्थैः। रामैः पीडा संततं वार्कधिष्ण्याद्भ्वेकु
द्रैर्दिग्भिरुक्तं हि सस्तत्। १४।

फलं गलितेन प्रसाधयेदिष्टासिद्ध्यर्थमिति

फलं गलितेन प्रसाधयेदिष्टासिद्ध्यर्थमिति। अथ गेहारंभे नक्षत्रशुद्ध्यर्थं वृषवास्तुचक्रमाह। गेहेति। आदिना प्रासादादिग्रहः ४
अर्कभात् सूर्याक्रांतनक्षत्रात् रामैस्त्रिभिर्वत्सशीर्षे वृषशिरसि स्थितैर्गेहारंभे गृहस्य दाहः फलं स्यादेवमग्रेपि। युगैश्चतुर्भिः। नैःस्वं द
रिद्रं प्रकारांतरेण निष्कृष्टमर्थमाह। अर्कधिष्ण्यादिति। अर्कधिष्ण्यात् सूर्याक्रांतनक्षत्रात् सप्तभिः रसान्निघं तत एकादशभिः सप्ततो द
शभिरसत्फलमुक्तं। उभयोः शालिनी वृत्तं। १४।।

अथ सौरचांद्रमासैक्यं नक्षत्रानुसारेण गृहारंभमासानाह। कुंभ इति। अर्के कुंभस्थे फाल्गुने च चांद्रे मासि तथा सिंहकर्कयोरर्के श्रावणे चांद्रे। नक्रे मकरेऽर्के पौषे चांद्रे। प्रागपरमुखं पूर्वपश्चिमद्वारकं गृहं सत्। गोजगे वृषमेषगेऽर्के राधे वैशाखे चांद्रे। जूकालिगे तुलावृश्चिकगेऽर्के मार्गे मार्गशीर्षे चांद्रे याम्योत्तरमुखसदनं दक्षिणोत्तरद्वारं गृहं सत्। तृणादिगृहनिर्माणे तु न मासनियमः स्यात् लोकव्यवहारोप्ययं। निबिडः परविरलेषु स्वानुकूले शुभे दिने। तृणदारुगृहारंभे मासदोषो न विद्यते। अथ गृहारंभे नक्षत्राण्याह। ध्रुवेति। उ३। रो। मृ। रे। चि। अनु। श। स्वा। ध। ह। पुष्यैः गृहारंभः सन्नित्यर्थः। सूतीगृहनिर्माणप्रवेशयोर्विशेषमाह प्रसूतीति पुनर्वसौ सूतीगेहं निर्मितव्यं श्रवणाभिजितोश्च तत्र प्रवेशः शुभः। श्रावणपक्षे श्रवणाभिजितोर्मुहूर्त्तद्वयोर्वा ग्राह्यः। तत्र नक्षत्रादित्रिवर्णविषयं बोध्यं। ब्राह्मणस्य तु प्रागुक्तध्रुवादिष्वेव शुभं। यदाह लल्लः। पुनर्वसौ न पार्वीनां कर्त्तव्यं सूतिकागृहं। श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेदिति।

कुंभेऽर्के फाल्गुने प्रागपरमुखगृहं श्रावणे सिंहकर्योः पौषे नक्रे च याम्योत्तरमुखसदनं गोजगेऽर्के च राधे। मार्गे यूकालिगे
सत् ध्रुवमृदुवरुणस्वातिवस्वर्कपुष्यैः सूतीगेहं त्वदित्यां हरिभविधिभयोस्तत्र शस्तः प्रवेशः॥१५॥ केचिन्मेषरवौ म
धौ वृषभगे ज्येष्ठे शुचौ कर्कटे भाद्रे सिंहगते घटेऽश्वयुजि चोर्जेऽलौ मृगे पौषके। माघे नक्रघटे शुभं निगदितं गेहं तथा
जैमिनिः सत्कन्यायां च तथा धनुष्यपि न सत्कुंभादिमासा भवेत्॥१६॥

तद्दपि नैरृतेकोणे नवमे मासि शुक्ले पक्षे विरिक्ते तिथौ रविकुजेतरवारे निर्मातव्यमित्यादिग्रंथांतरादबोध्यं। स्रग्धरा॥१५॥ अथ विनैव दारविचारं मासनिर्णयमाह। केचिदिति। मेषरवौ मधौ चैत्रेपि गृहारंभः शुभोप्यन्मीनार्के चैत्रे न कार्यः। वृषभगेऽर्के ज्येष्ठेपि शुभः वैशाखस्तु शुभ एव। मिथुनार्के तु ज्येष्ठे नेत्यर्थः। कर्कटेऽर्के शुचावाषाढेपि शुभः। मिथुनार्के तु शुचौ न। सिंहगेऽर्के भाद्रेपि शुभः श्रावणस्तु शुभ एव। कन्यार्के तु भाद्रे नेत्यर्थः। घटे तुलार्के अश्वयुजाश्विनेपि सन् कन्यार्केऽश्वयुजि नेत्यर्थः। अलौ वृश्चिकस्थेऽर्के ऊर्जे कार्त्तिकेपि सन् कन्यार्के तूर्जे नेति स्वयमेव वक्ष्यति। मार्गशीर्षमासस्तु श्रेष्ठ एव मकरस्थेऽर्के पौषेपि सन् धनुरर्के पौषे न सन्निति भावः। मकरकुंभगेऽर्के माघेपि सन् धनुरर्के तु नेति। श्रीपतिकृतमाघोर्जनिषेधविषयमाह येति। कन्यायामर्के

ऊर्जौ नसन्न् तथा धनुष्यर्के तपमाघौ न सन्न् । ननु कार्तिके कन्यायां माघे च धनुषः संक्रांतिरेव न संभवतीति चेत्तत्राह । कुलीति सर्सं मुक्ता दि मासगणनयैवं कुर्सादिगणनया तु भवति माघोर्जयोरपि धनुः कन्यार्कसंभव इति निषेधोपपत्तिः ॥१५॥ अथ तिथिपरत्वेन द्वारनिषेधमाह । हरौ सुप्त इति । हरौ सुप्ते हरिशयिनीमारभ्य कुत्साष्टम्यंतं तिथिषु प्राग्वदनं पूर्वाभिमुखं द्वारं गृहं न शु-
५ भं वदंति ततः कृष्णनवम्यादिषु चतुर्दश्यंतेषु उदङ्मुखं न शुभं । दर्शादितो मावास्यामारभ्य तुला ष्टम्यंत प्रत्यङ्मुखं न शुभं । ततो नव-
मीमारभ्यासित चतुर्दशी यावद्दवाङ्मुखं दक्षिणद्वारं न शुभं । तत्तत्तिथिषु तत्तद्दिगभिमुखं द्वारं न कर्तव्यमिति संधिः । वराहेण इत्यादि
६ भिर्दारिवेधोन्यबोधि । मार्गतरुकूपपंकस्तंभभ्रमविद्धमशुभं द्वारं । उच्छ्रायाद्द्विगुणितां भूमिं त्यक्त्वा न दोषाय ॥१६॥ अमी जलनिर्गम श्र

हरौ सुप्ते तः प्राग्वदनं नवम्यादिषूत्तरास्यं त्वथ पश्चिमास्यं । दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं वदंति ॥१७॥
भौमार्करिक्ता माघूने चरोनेंगे विपंचके । व्यष्टांत्यस्थैः शुभैर्गेहारंभस्त्वपारिगैः खलैः ॥१८॥ या

मार्गः प्रणालाख्यः । विद्ध्त्वं संमुखावस्थितत्वं । उच्छ्रायो द्वारोन्नत्यं तत्फलमाह । रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा । पं-
कद्वारे शोको व्ययो बुधनिःस्त्रावि तिप्रोक्तः कूपेनापस्मारो भवति विनाशश्च देवताविद्धे । स्तंभेन स्त्रीदोषः कुलनाशो ब्र-
ह्मणोभिमुखे इति । उपजातिः ॥१६॥ अथ गृहारंभे पंचांगशुद्धिं लग्नशुद्धिं चाह । भौमार्कौति । भौमार्कौ वारौ रिक्ता ४।९।१४ अमाद- ५
र्शः आदिः प्रतिपत् । उपलक्षणतया ष्टमी ग्राह्या । एतैरूने शेषवारपंचके चं । बु । दृ । शु । श । २।३।५।६।७।१०।११।१२।१३।१५ ति-
थिषु चेत्यर्थः । चरे १।४।७।१० लग्ने रूनेंगे स्थिरे द्विस्वभावे च लग्ने इत्यर्थः । विपंचके धनिष्ठादिपंचकहीने पूर्वोक्ते ध्रुव-
मृद्वादौ नक्षत्रे । शुभैः केंद्रादिभिर्लग्नाष्टमद्वादशेतरस्थानस्थैः पापैश्च त्रिषडेकादशगैर्गृहारंभः शुभ इत्यर्थः ॥१८॥

अथप्रथमखातायां राहोर्मुखमाह। देवालय इति। देवालये कर्त्तव्ये मीनार्कतो गेहविधौ गृहारंभे सिंहार्कतः जलाशये कूपादौ मक
रार्कतो गणनया त्रिभे त्रिषु त्रिषु राशिषु शंभुदिशः ईशानात् विलोमतः प्रतीपगणनया राहोर्मुखं ज्ञेयं। यथा देवालये कार्ये मीनमे
षवृषस्थेऽर्के राहोर्मुखमैशान्यां ततो मिथुनादित्रिकस्थेऽर्के वायव्यां कन्यादित्रिकस्थे नैरृत्यां चापादित्रिकस्थे आग्नेय्यां एवं
गेहादौ सिंहादितः आरभ्य गणनीयं। ननु भवत्वेवं राहुमुखस्थितिः परंतु खातः कुत्र कार्य इत्यत आह। खात इति। खाते प्रथ
मखनने कर्त्तव्ये मुखात् यत्र कोणे राहुमुखं ततः पृष्ठ पश्चिमा विदिक् शुभा भवेत् तत्र खातः कार्य इत्यर्थः। यथैशान्यां रा
हुमुखे आग्नेय्यां पृष्ठं वायव्यां मुखे ऐशान्यां पृष्ठं नैरृते मुखे वायव्यां पृष्ठं आग्नेय्यां मुखे नैरृते पृष्ठमिति। इंद्रवंशा॥१८॥
अथ गृहकूपदेशफलमाह। कूप इति। वास्तोर्गृहस्य मध्ये कूपे कृते अर्थनाशः फलं। ऐशाने पुष्टिः प्राच्यामैश्वर्यवृद्धिः आग्ने

रा॰ मु॰	ऐशान	वायु	नैरृ	आग्ने
देवालय	१२।१।२	३।४।५	६।७।८	९।१०।११
गृह	५।६।७	८।९।१०	११।१२।१	२।३।४
जलाशय	१०।११।१२	१।२।३	४।५।६	७।८।९

देवालये गेहविधौ जलाशये राहोर्मुखं शंभुदिशो विलोमतः। मीनार्कसिंहार्कमृगा
र्कतस्त्रिभे खाते मुखात् पृष्ठविदिक् शुभा भवेत् ॥१८॥ कूपे वास्तोर्मध्यदेशेऽर्थनाशस्त्वैशा
न्यादौ पुष्टिरैश्वर्यवृद्धिः। सूनोर्नाशः स्त्रीविनाशो मृतिश्च संपत्पीडा शत्रुतः स्याच्च सौख्यं
॥१९॥ कूपेऽर्कभान्मध्यगतैस्त्रिभिर्भैः स्वादूदकं पूर्वदिशस्त्रिभैस्त्रिभैः। मिष्टं जलं क्षार
जलं क्रमाद्भवेत् ज्ञास्त्वर्यभात् त्रिविभितैः शुभाशुभम् ॥२०॥

य्यां पुत्रनाश एवमग्रेऽपि विनियोज्यं। शालिनी॥१९॥ अथ कूपारंभे नक्षत्रशुद्धिमाह। कूप इति। अर्काक्रांतनक्षत्रान्मध्ये प्राच्या
द्यष्टदिक्षु चक्रमात् त्रिकं त्रिकं नक्षत्राणां देयं तत्फलं मध्यगतनक्षत्रत्रिके कूपारंभे स्वादूदकं स्यात्। ततः प्राच्याद्यष्टके क्रमात्
मिष्टं क्षारं च जलं स्यात्। मतांतरमाह। वेति। सूर्यनक्षत्रात् त्रिके शुभं ततस्त्रिके ऽशुभमिति क्रमो बोध्यः। तथा चेतत्त्रके मृ
दुमित्रार्कध्रुववासवांबुपेष्वादिप्राम्बु विहितभगणमध्यगे नक्षत्रे कूपारंभः शुभ इति॥२०॥ इंद्रवज्रोपेंद्रवंशायोरुपजातिः॥२०॥

अथ प्रशालांतर्गतस्नानाद्यागार निर्माणार्थं दिग्विभागमाह। स्नानसेति। पूर्वादितो दिगष्टके स्नानादीनां गृहालयः स्युः तत्र स्नान
गृहं प्राच्यां अग्न्यादि पचनस्थानमाग्नेय्यां शयनालयं दक्षिणे अस्त्राणं चापशरादीनामभ्यास स्थापनाद्यर्थं गृहं नैरृते। भुजेभोजि
६ नक्रियायाः स्थानं प्रतीच्यां। धान्यस्थानं संचयस्य मंदिरं वायव्यां। भांडारं कोष्ठागारमुदीच्यां। देवार्चनस्थलमैशान्यां। तन्मध्य
तस्तासां दिशां विदिशां च मध्यतो मथनादीनां स्थानं स्यात्। यथा पूर्वाग्नेय मध्ये मथनस्य दध्यादि विलोडनस्य गृहं। आग्नेय दक्षि
6 णमध्ये आज्यस्य घृतस्य संग्रहार्थं गृहं। दक्षिण नैरृत मध्ये पुरीषस्य त्यागाय गृहं। एवमग्रेपि योजना। विद्याभ्यासः शास्त्र पठ
नं रोदनं शोकादिवशेनाश्रुविमोक्षः। रतं कामभोगः औषधं रोगापनयाय यागादकरणं सर्वधाम उक्तव्यातिरिक्त सर्ववे
स्तूनां संचयार्थं धाम गृहमेषामन्त पूर्वयोर्मध्ये कार्यं। वसंततिलका।२१। अथ गृहस्यायुर्दायार्थं विशिष्टलग्नबलमाह। जी

स्नानसपाकशयनास्त्र भुजेभ्य धान्य भांडार देवत गृहालि च पूर्वतः स्युः। तन्मध्यतस्तु मथनाज्य पुरीष
विद्याभ्यासाख्य रोदन रतौ षध सर्वधाम।२१। जीवार्कविद्शुक्र यानैश्चरे षु लग्नारि र्यामित्र सुख त्रिगेषु।
स्थितिः शतं स्याच्छरदां सिताकारिज्येतनु त्र्यंग सुतेष्वतो हि।२२। लग्नां वरायेषु भृगु ज्ञ भानुषु केंद्रे गुरौ
वर्षशतायुरालयः। बंधौ गुरौ व्योम्नि शशी कुजार्कजौ लाभे तदा शीतिसमायुरालयः।२३। स्वोच्चे शुक्रे ल
ग्नगे वा गुरौ वे श्मगतेथवा। शनौ स्वोच्चे लाभगे वा लक्ष्म्यायुक्तं चिरं गृहं।२४।

वार्केति। अत्र ग्रहाणां गृहाणां च यथाक्रममन्वयो बोध्यः। लग्ने सू६ बु७ शु४ श२ च देवं नियतस्थान भावे स्थिते ग्रहाः ६
सुस्ता शरदां वर्षाणां शतं गृहस्य स्थितिः स्यात्। एवमग्रेपि श्र सू२ मं६ बृ५ चेत्तदा २००। उपजातिः।२२। लग्नेति भृ१ बु१
सू१ गुरुः।१।४।७।१० अन्यतमस्थः १०० मालयप्राप्तः पुंसि। गु४ चं१० भौमशनी ११ चेत्तदा ८०।। इंद्रवंशा।२३।। प्रधान
स्तु भद्रं योगत्रितयमाह। स्वोच्चे इति। उच्चस्थः शुक्रो लग्नगः १ योगः। उच्चगुरुश्चतुर्थगः २ उच्चशनिर्लाभगः ३ गृ
हस्य लक्ष्मी पूर्णत्वं योगत्रितयजं फलम्।। अनुष्टुप।।२४।। ॥ ॥ ॥ ॥ ॥

अथ शुभयोगमाहैकं । धूनेति । यद्येकोपि ग्रहः परांशास्थः शत्रुनवांशकगतः लग्नात् ७।९ वास्यान्तदा स ग्रहो द्यूतवर्गमध्ये
गृहं परहस्तस्थं स्वामिहस्ताद्दूरमन्यगामि करोति । अपि शब्दाद्दशनवांशस्थग्रहादि त्वादौ केन्द्रस्थं वोध्यं परंतु यदि बलौ
वा विप्रा धीशो भार्गवेज्या वित्तुच्चवर्गपतिरबली निर्बलः स्यात्तस्य सबलत्वे तु न दोष इत्यर्थः । २५ । अथ ग्रहनक्षत्रवारो
नक्षत्रभाग्यमयोगपंचकमाह । पुष्येति । पुष्य । उ ३ रो । म । श्र । ५ एते । एवंविधानक्षत्रैः सजीवे गुरुविधिष्ठे तैस्तस्यैव गुरो
वरेण चक्रकृतमारब्धं गृहं सुतं राज्यं च ददाति यदा तादृशयोगारब्धगृहे जातस्य सुतस्यापि अवश्यं राज्यं स्यादित्यर्थः । ९
तद्गृहे जातपुत्रस्य राज्यं भवति निश्चयादिति नारदवाक्यात् एवमग्रेपि व्याख्यानं शुक्रवारे शुक्राक्रान्तैः वि । ५ चि । चि ।
ध । श । ११ इभिः कृतं गृहं धनं धान्यं च ददाति । वसंत ० । २६ । सार्द्रेति । कुजवारे कुजाक्रान्तैः ह । पुष्य । रे । म । एवंविधा

धूनांवरे यदैकोपि पराशास्थो ग्रहो गृहं । अब्दांतः परहस्तस्थं करोति दशवांशवत् । २४ । पुष्यध्रुवेंदुहरि
सार्पजलैः सजीवैस्तद्वासरेण च कृतं सुतराज्यदं स्यात् । द्वीशाश्विवसुपाशि शिवैः सशुक्रैर्वारे सि
तस्य च गृहं धनधान्यदं स्यात् । २६ । सार्द्रेः करेज्यासमघांबुमूलैः कौजे हि वेश्माग्निसुतार्तिदं स्यात् । स
द्रैः कदास्त्रार्यमतक्षहस्तैर्ज्ञस्यैव वारे सुखपुत्रदं स्यात् । २७ । अजैकपादहिर्बुध्न्यशक्रमित्रानलांतकैः । समं
दैर्मंदवारे स्याद्दत्नोभ्य तत्सुतं गृहं । २८ ।

मूलैः कृतं वेश्म गृहमग्निदाहं पुत्रपीडां च यच्छति । बुधवारे बुधाधिष्ठितैः रो । ५ चि । उफा । चि । हस्तैर्निर्मितं गृहं सुखं पु
त्रं च ददाति । इंद्रवज्रा । २७ । शनिवारे शनिक्रान्तैः एभा । उभा । जे । ५ नु । कृ । भरणीभिर्निर्मितं गृहे रत्नाभिर्भूतं पुत्रं स्यात् तच्च ध
नधान्यादिहीयते जायमाना स्वसंततिर्विनश्यति तद्वासि जनानां चोद्वसनं भवतीत्यर्थः । अतोस्मिन्योगपंचके हृषवास्तुच
के च शोधिते पुरा विहितेस्मद्ध्रुवादौ नक्षत्रे गृहमारंभणीयमेव मे बकूपाद्यारंभ इति । २९ । अथायाद्यर्थं तद्भूमेतनुलग्नं चक्र
माह । द्यूनाद्यादिति । वास्तुनवभागा भवति ऊर्ध्वाधोमध्यभेदेन त्रयः चत्वारः कोणाः चत्वारः पार्श्वा इति । तत्रोर्ध्वभागस्य

शिरः इति संज्ञा अधोभागस्य च देहलीति पार्श्वयोश्च शाखेति तत्र स्वर्याधिष्ठितनक्षत्राच्चतुर्भिः। शिरस्यवस्थितैर्नक्षत्रै
र्द्वारे कृते लक्ष्मीलाभः फलं ततो द्वयं द्वयं कोण इति कोणस्थैरष्टभिरुद्वसनं निर्जनता स्यात्। ततश्चत्वारि नक्षत्राणि
६ पार्श्वयोरिति शाखासु स्थितैरष्टभिः सौख्यं। ततो देहल्यां त्रिभिर्गृहस्वामिमृतिः ततो मध्यगैश्चतुर्भिः सौख्यमेव शुभ
नक्षत्रं चक्रे विशोध्य द्वारं शुभं विधेयं। मृगांत्यपुष्यवारुणचित्राध्रुवे सद्वाररोपणं। पंचसप्ताष्टभ[illegible]नंदेषु तिथिष्वेव न चान्य
दा। मार्तंडतिथिक्लिष्टं। इति श्रीमुहूर्तचिंतामणिटीकायां पीयूषकलिकाख्यायां वास्तुप्रकरणं समाप्तम्। शुभमस्तु
सुखं चास्तु शरीरारोग्यमस्तु मे। धर्मे मतिः सदस्तु प्रीतिः श्रीरामे भक्तिरस्तु मे। १॥ ॥ ॥ ॥

सूर्यर्क्षाद्युगभैः शिरस्यथ फलं लक्ष्मीस्ततः कोणभैर्नागैरुद्वसनं ततो गजमितैः शाखासु सौख्यं
भवेत्। देहल्यां गुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यं चक्रमिदं विलोक्य सुधिया द्वारं विधे
यं शुभं। २९॥ ॥इति श्रीदैवज्ञानंतसुतरामदैवज्ञविरचिते मुहूर्तचिंतामणौ वास्तुप्रकरणं
समाप्तिमगात्॥ शुभमस्तुतराम्॥ ६